# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा, नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| **कक्षा- आचार्य-१ (SEM-1)** | **प्रश्नपत्र-२** | **गुणा: - ७०** |
| **विषय:- धर्मशास्त्रम्** | **CC411** | **समय: - ०३ त: ०६** |
| **दिनाङ्क: - ०६/१२/२०१६** | **सन्दर्भग्रन्थ: - निर्णयसिन्धु: ( प्रथम: परिच्छेद: ), पारस्करगृह्यसूत्रम् ( प्रथमकाण्डम् )** | |

**॥ प्रथमान्विति: ॥**

**प्र-१ निम्नलिखितेषु कस्यचिदेकस्य ससन्दर्भं प्रसङ्गपूर्वकं संस्कृते भावार्थो लेख्य: ।** **०४**

१. अयनद्वितये श्राद्धं विषुवद्धितयेन तथा ।
सङ्क्रान्तिषु च सर्वासु पिण्डं निर्वपणाहत ॥

२. मासद्वयेब्दमध्ये तु सङ्क्रान्तिर्न यदा भवेत् ।
प्राकृतस्तत्रपूर्व: स्यादधिमासस्तथोत्तर: ॥

**प्र-२ कस्याप्येकस्य सविस्तरम् उत्तरं लिखत ।** **१२**

१. सर्वासां तिथीनां निर्णयविचारं यथाग्रन्थं लिखत ।

२. निर्णयसिन्धुग्रन्थस्थान् विषयान् विवृणुत ।

**प्र-३ कयोश्चित् द्वयो: लघूत्तरं लिखत ।** **०४**

१. निर्णयसिन्धो: कर्तु: नाम किम् ?

२. षडशीत्याख्यं किमुच्यते ?

३. चान्द्रोब्दस्य कति भेदा: सन्ति ?

४. काला: कतिधा ? के च ते ?

५. अब्दा: कतिधा ? के च ते ?

**॥ द्वितीयान्विति: ॥**

**प्र-४ अधस्तात् कस्यचिदेकस्य ससन्दर्भं व्याख्यां कुरुत ।** **०४**

१. चत्वारीमानि कर्माणि सन्ध्यायां परिवर्जयेत् ।
आहारं मैथुनं निद्रा स्वाध्यायं च चतुर्थकम् ॥

२. अस्तगे च गुरौ शुक्रे बाले वृद्धे मलिम्लुचे ।
उद्यापनमुपारम्भं वृतानां नैव कारयेत् ॥

**प्र-५ कस्यचिदेकस्य निबन्धात्मकमुत्तरं लिखत ।** **०८**

१. निर्णयसिन्धो: मानवजीवने प्रभावं प्रदर्शयत ।

२. मानवजीवनव्यवहारे कर्मणि च तिथीनां किं प्रयोजनम् ?

**प्र-६ केषाञ्चन त्रयाणां लघूत्तराणि लिखत ।** **०३**

१. रुद्रकथने कस्या: तिथे: ग्रहणं भवति ?

२. निर्णयसिन्धु शब्दे क: समासो विद्यते ?

३. नक्तमिति शब्दस्य पर्यायशब्दं किम् ?

४. उपवास शब्दस्य का व्युत्पत्तिः ?

५. व्रतकाले केषां स्पर्शः न करणीयः ?

**॥ तृतीयान्वितिः ॥**

**प्र-७ अधस्तात् कस्यचिदेकस्य ससन्दर्भमुत्तरं प्रदेयम् ।** **०४**

१. पूर्वसङ्कल्पितं यच्च व्रतं सुनियतव्रतैः ।
तत्कर्तव्यं नरैः शुद्धं दानार्चनविवर्जितम् ॥

२. युगं मध्यं दिने यत्र तत्रोपोष्यफलीश्वरान् ।
क्षीरेणाप्याप्यपञ्चम्यां पूजयेत् प्रयतो नरः ॥

**प्र-८ कस्याप्येकस्य सारांशो लेख्यः ।** **०८**

१. चतुर्थीनिर्णयं यथाग्रन्थं प्रतिपादयत ।

२. एकादश्याः निर्णयं समीक्षत ।

**प्र-९ अधस्तनेषु त्रयाणामुत्तरं संक्षेपेण लिखत ।** **०३**

१. एकादश्याः कति के च भेदाः विद्यन्ते ?

२. ज्योतिर्गर्गानुसारं विवाहादिशुभकार्येषु कः मासः श्रेष्ठः ?

३. दशसामान्यधर्माचरणानि कानि ?

४. वैदिकौपनिषदिककर्मणोः किं दानं प्रदेयम् ?

५. ताम्बुलनिषेधं कस्यां तिथौ विद्यते ?

**॥ चतुर्थान्वितिः ॥**

**प्र-१० निम्नलिखितयोः एकस्य ससन्दर्भं व्याख्या कार्या ।** **०४**

१. आज्यमुद्वास्योत्पूयावेक्ष्य प्रोक्षणीश्च पूर्ववदुपयमनान् ।
कुशानादाय समिधोऽभ्याधाय पर्य्युक्ष्य जुहुयादिति ॥

२. पञ्चमहायज्ञा इति श्रुतेः ग्रन्थानुगुणं निरूपयत ।

**प्र-११ कस्याप्येकस्य सविस्तरमुत्तरं लिखत ।** **१२**

१. पारस्करगृह्यसूत्रस्य परिचयं लिखत ।

२. पारस्करगृह्यसूत्रस्य प्रथमकाण्डस्य सारांशो लेख्यः ।

**प्र-१२ अधस्तनेषु प्रश्नद्वयस्य अतिलघूत्तरे लिख्यताम् ।** **०४**

१. पारस्करगृह्यसूत्रम् कस्य वेदस्य अस्ति ?

२. पारस्करगृह्यसूत्रे कति कण्डिकाः सन्ति ?

३. लाजाहोमस्य कोऽर्थः ?

---